अन्यत्र नष्टस्य न लाभ इत्येतत्परतया तत्रान्धत्वम् भाक्तम्। अन्धयतीत्यन्धम् अन्ध—चु॰ प्रेरणे णिच्—अच्, अन्ध—करणे अच् वा। तमसि अन्धकारे “अन्धं तमस्ते प्रविशन्ति ये के चात्महनो जना इति” श्रुतिः। यथार्थ ज्ञानावरके वेदान्तिमतसिद्धे अज्ञाने च ‘आसीदिदं तमोभूतमिति” मनौ ‘तमसावृततत्त्वेनेति” “तमसा वृतं तत्त्वं नानुपश्यति मूढधीरिति” च पुराणे तमः-शब्देनाज्ञानस्यैवाभिधानात्तथात्वम्। जले न॰ मेदि॰। तस्य मनुष्याणामन्धकारित्वात्तथात्वम् तेषां हि जलमध्ये उन्मीलितनेत्राणामपि न दर्शनमित्यनुभवसिद्धम्।

**अन्धक** पु॰ अन्ध—ण्वुल्। दैत्यभेदे स च दैत्यः दितौ कश्यपादुत्पन्नः तस्य वरेण महादेवैरवध्यतामापेदे यथोक्तं हरिवंशे १४५ अ॰ “दितिरुवाच हतपुत्त्रास्मि भगवन्! देवैर्धर्मभृताम्बर!। अवध्यं पुत्त्रमिच्छामि देवैरमितविक्रमम्। कश्यप उवाच। अवध्यस्ते सुतो देवि! दाक्षायणि! भवेदिति। देवानां संशयो नात्र कश्चित् कमललोचने!। देवदेवमृते रुद्रं तस्य न प्रभवाम्यहम्। आत्मा ततस्ते पुत्त्रेण रक्षितव्यो हि सर्व्वथा। अन्वालभत तां देवीं कश्यपः सत्यवागथ। अङ्गुल्योदरदेशे तु सा पुत्रं सुषुवे ततः। सहस्रबाहुं कौरव्य! सहस्रशिरसं तथा। द्विसहस्रेक्षणञ्चैव तावच्चरणमेव च। स व्रजत्यन्धवद्यस्मादनन्धोऽपि हि भारत!। तमन्धकोऽयं नामेति प्रोचुस्तत्र निवासिनः। अवध्योऽस्मीति लोकान् स सर्व्वान् बाधति भारत!। हरत्यपि च रत्नानि सर्व्वाण्यात्मबलाश्रयात्। बाधयत्यात्मवीर्य्येण निगृह्याप्सरसां गणान्। स्ववेश्मन्यूर्ज्जितोऽत्यर्थं सर्व्वलोकभयङ्करः। परदारापहरणं पररत्नविलोपनम्। चकार सततं मोहादन्धकः पापनिश्चयः” इति “निशितत्रिशूलदारितान्धकमहासुर इति” काद॰। अन्ध एव अन्धकः स्वार्थे कन्। मुनिभेदे स च वृहस्पतिज्येष्ठभ्रातुः उतथ्यात् ममतायामुत्पन्नः वृहस्पतिशापादन्धत्वमापेदे। तस्य जात्यन्धत्वात् दीर्घतमा इति नामान्तरं तत्कथा भा॰ आ॰ प॰ १०४ अ॰ ‘उतथ्यस्य यवीयांस्तु पुरोधास्त्रिदिवौकसाम्। वृहस्पतिर्वृहत्तेजा ममतामन्वपद्यत॥ उवाच ममता तन्तु देवरं वदताम्वरम्॥ अन्तर्वत्नी त्वहं भ्रात्रा ज्येष्ठेनारम्यतामिति। अयञ्च मे महाभाग! कुक्षावेव वृहस्पते!। औतथ्यो वेदमत्रापि षडङ्गं प्रत्यधीयत॥ अमोघरेतास्त्वञ्चापि द्वयोर्नास्त्यत्र सम्भवः। तस्मादेवं गतेऽद्य त्वमुपारमितुमर्हसि॥ एवमुक्तस्तया सम्यक् वृहस्पतिरुदारधीः। कामात्मानं तदात्मानं न शशाक नियन्त्रितुम्॥ स बभूव ततः कामी तया सार्द्धमकामया। उत्सृजन्तं तु तं रेतः स गर्भस्थोऽभ्यभाषत॥ भोस्तात! मा गमः कामं द्वयोर्नास्तीह सम्भवः। अल्पावकाशो भगवन्! पूर्व्वञ्चाहमिहागतः। अमोघरेताश्च भवान्न पीडां कर्त्तुमर्हसि॥ अश्रुत्वैव तु तद्वाक्यं गर्भस्थस्य वृहस्पतिः। जगाम मैथुनायैव ममतां चारुलोचनाम्॥ शुक्रोत्सर्गं ततो बुद्ध्वा तस्या गर्भगतो मुनिः। पद्भ्यामरोधयन्मार्गं शुक्रस्य च वृहस्पतेः॥ स्थानमप्राप्तमथ तद्रेतः प्रतिहतन्तदा। पपात सहसा भूमौ ततः क्रुद्धो वृहस्पतिः॥ तद्दृष्ट्वा पतितं शुक्रं शशाप स-रुषान्वितः। उतथ्यपुत्रं गर्भस्थं निर्भर्त्स्य भगवानृषिः॥ यन्मां त्वमीदृशे काले सर्व्वभूतेप्सिते सति। एवमात्थ वचस्तस्मात्तमो दीर्घं प्रवेक्ष्यसि॥ स वै दीर्घतमा नाम शापादृषिरजायत। वृहस्पतेर्वृहत्कीर्त्तेर्वृहस्पतिरिवौजसा॥ जात्यन्धो वेदवित् प्राज्ञः पत्नीं लेभे स विद्यया। तरुणीं रूपसम्पन्नां प्रद्वेषीं नाम ब्राह्मणीम्॥ स पुत्रान् जनयामास गौतमादीन् महायशाः” इति। यादवभेदे च “सात्त्वतान् सत्त्वसम्पन्नान् कौशल्या सुषुवे सुतान्। भजिनं भजमानञ्च दिव्यं देवावृधं नृपम्। अन्धकञ्च महाबाहुं वृष्णिञ्च यदुनन्दनम्। तेषां विसर्गाश्चत्वारो विस्तरेणेह तान् शृणु। अन्धकात् काश्यदुहिता चतुरोऽलभतात्मजान्। कुकुरं भजमानञ्च शमं कम्बलवर्हिषम्”। इति हरिवंशे ३८ अ॰। “दूतं संप्रेषयामास वृष्ण्यन्धकनिवेशनम्, ततो वृष्ण्यन्धकाः कृष्णमिति” हरिवंशः।

**अन्धकरिपु** पु॰ ६त॰। महादेवे तस्य तन्नाशकत्वात्तथात्वम् यथा हरिवंशे १४६ अ॰ ‘मुमोच भगवाञ्छूलं प्रदीप्ताग्निसमप्रभम्। तत् पपात हरोत्सृष्टमन्धकोरसि दुर्द्धरम्। भस्मसाच्चाकरोद्रौद्रमन्धकं साधुकण्टकमिति”। अन्धकहन्त्रादयोऽप्यत्र। अन्धकस्यान्धकारस्य रिपुरपसारकत्वात्। सूर्य्ये, चन्द्रे, वह्नौ, च पु॰।

**अन्धकवर्त** पु॰ अन्धक इव वर्त्तते वृत—अच्। पर्वतभेदे गहा॰ छ। अन्धकवर्त्तीयस्तद्भवे त्रि॰।

**अन्धकार** पुंन॰ अन्धं करोति कृ—अण् उप॰स॰। तमसि तच्च तेजोद्रव्यसामान्याभावरूपमिति नैयायिकाः। नीलं तमोधावतीति प्रयोगात् नीलरूपवत् धावनादिक्रियावच्च द्रव्यान्तरम्, आलोकस्य अन्यत्र चाक्षुषप्रत्यक्षे सहकारित्वेऽपि तमःप्रत्यक्षे मेचकप्रत्यक्षइव न सहकारिता